संस्कृत

याज्ञिक

विधिः ~~प्रयोग~~ - स्मार्त

दत्तकपुत्रदान विधि

✓ ३१६४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) श्रीगणेशायनमः ॥ अथदत्तपुत्रविधानं ॥ अथसर्वान्बंधून्समाहूयग्रामस्वामिनंपृथ्वीशं
चान्यांश्चजनान्मेलयित्वाशुभेमुहूर्तेलग्नादौसर्वेषामनुज्ञांलब्ध्वामंगलस्नानंततःपत्न्यासहस
मन्वारब्धोयजमानोदर्भान्धारयमाणोगणेशमिष्टदेवतांचध्यात्वासंकल्पंकुर्यात् ॥ तद्यथा ॥
अद्येत्यादि॰ आत्मनःपुत्रपौत्रादिसंतानकामोहंअपुत्रतादोषपरिहारार्थंशौनकोक्तस्मृतिमाश्रि
त्यदत्तपुत्रसंग्रहंकरिष्ये ॥ ततआदौगणेश्वरपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धं
आचार्यब्रह्मवरणंचकरिष्ये ॥ इतिसंकल्प्यगणेशाह्नादिनांदीश्राद्धांतंकृत्वाचार्यंवृणुयात् ।
अमुकप्रवरोपेतंअमुकगोत्रोमुकशाखाध्यायीअमुकशर्माहं अमुकप्रवरंअमुकगोत्रंअ
मुकशाखाध्यायिनंअमुकशर्माणंब्राह्मणंदत्तपुत्रविधानेआचार्यत्वामहंवृणे । वृत्वामधुपर्क
पूजांकुर्यात् । वाससीकुंडलेछत्रमुष्णीषंचाचार्यायदद्यात् ॥ एवंब्रह्माणंवृणुयात् ॥ ततःपृथ्वीध
रंमधुपर्कादिनापूजयेत् । ततःआचार्यःस्वगृह्योक्तविधिनाअग्निंप्रतिष्ठाप्य । ततोन्वाधानं ॥
अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाअत्रप्रधानं । प्रजापतिंअष्टाधिकशतसंख्य

पापायसाहुतिभिर्यक्ष्ये । प्रजापतिं अष्टाधिकशतसंख्ययाऽऽज्याहुतिभिर्यक्ष्ये · जातवेदसमग्निं दूर्वा
ज्येन यक्ष्ये । सूर्यासावित्रीं दूर्वाज्येन यक्ष्ये · ततः शेषेण स्विष्टकृतमित्यादि आज्यभागांतं कृत्वा प्रधान
होमं कुर्यात् · प्रजापते * षड्‍ * हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् · होमे वि० · ॐ प्रजापते · प्रजापतय इ·
इति गृहसिद्धान्नपायसं हुत्वा तेनाज्यं तु कुर्यात् · ततः आचार्यसहितो यजमानः दातुः समीपं
गत्वा वस्त्राभरणफलपुष्पादि दात्रे दत्वा संतानकामाय मम त्वं पुत्रं देहीति दातारं याचयेत् · त
तो दाताउदङ्मुख प्राङ्मुखाय प्रतिगृहीत्रे दद्यात् · तद्यथा · त्रीन् प्राणायामं कृत्वा देशका
लौ स्मृत्वाऽस्मिन् पुराणोक्तफलप्राप्त्यर्थं श्रीलक्ष्मीनारायणप्रीत्यर्थं पुत्रदानं करि
ष्ये · तदंगं प्रतिगृहीतुः पूजनं करिष्ये । ततः सपत्नीकं प्रतिगृहीतारं पूजयित्वा लक्ष्मीना
रायणस्वरूपाभ्यां एष गंध इति यथासंभवं पूजयित्वा वस्त्रादि दद्यात् · एवं संपूज्य प्राङ्मु
खाय स्वयमुदङ्मुख पुत्रदानं कुर्यात् · तद्यथा · अमुकगोत्रादि प्रथमांतनामशर्माणं तं संबु
ध्य लक्ष्मीनारायणस्वरूपिणे तुभ्यमहं अमुकं पुत्रं संप्रददे · न ममेति · लक्ष्मीनारायणः प्रीयतां · १

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

येयहस्तेनदक्षिणया·इतिपंचदानमंत्राननुपठित्वाकइदंकस्माअदादितिमंत्रंपठेत्·देवस्यत्वेतिमं
(2A) त्रेणप्रतिगृहीताप्रतिगृह्णीयात्·अंगादंगात्संभवसीतिमंत्रेणपुत्रमभिमंत्र्यपुत्रस्यमूर्धान
माघ्रायभूषणादिभिरलंकुर्यात्·ततःपुत्रछायानिषण्णांकृत्वापुनरग्निसमीपमागत्याज्या
हुतिंकुर्यात्॥यस्त्वाहृदेतिद्वयोर्वसुश्रुतोग्निस्त्रिष्टुप्·आज्यहोमेवि·यस्त्वाहृदा·स्व·१
जातवेदसेग्नयइ·।यस्मैत्वंसुकृद्वाविशो·स्व२जात·गय·२॥तुभ्यमग्रेसूर्यासावित्रीसूर्यासावि
त्रीअनुष्टुप्·होमेविनि·तुभ्यमग्रेपर्य·सहस्वाहा·१पुनःपत्नीमग्निरदा·शतंस्वाहा·२सोमः
प्रथमोविविदे·जाःस्वाहा·३॥सोमोददादितिपंचानांसूर्यासावित्रीऋषिः।सूर्यासावित्री
देवता·आद्येद्वेअनुष्टुभौ·तृतीयाजगती·चतुर्थीत्रिष्टुप्पंचमीअनुष्टुप्·आज्यहोमेवि·
सोमोददद्ग·इमांस्वाहा·१सूर्यासावित्र्याइदमितिसर्वत्र·।इहैवस्तंमा·गृहेस्वाहा·२आनः
प्रजांजनयतुप्र·पदेस्वाहा·३अघोरचक्षुःर·च्पदेस्वाहा·४इमांत्वमिंद्रमीढ्वः·०कृपिस्वाहा·५
एवमष्टाहुतीर्हुत्वास्विष्टकृतादिहोमशेषंसमाप्य·आचार्यायथाशक्तिविवर्जितांदक्षिणांद

त्वा॰ब्राह्मणेभ्योदद्यात्॰क्षत्रियस्तुराष्ट्रार्धं॰वैश्यश्चेद्दत्तंशतत्रयं॰शूद्रश्चेत्सर्वं॰अशक्तोयथाश
क्तिसर्वैर्दक्षिणादेयाएवंविधिनापुत्रमात्मीयंकृत्वापुण्याहवाचनादिनांदीक्षां॥स्वसूत्रोक्तजातक
र्मादिसंस्कारान्कुर्यात्॰जातकर्मादौजातेअवशिष्टान्संस्कारान्कुर्यात्॰उपनयनात्प्राक्॥उपनयने
जातेसपिंडोपिपुत्रोनस्वीकार्यः॥आप्रायशिशुसूर्यनीतिवचनविरोधात्॰शिशुरादत्तजननादि
श्रुतेरुपनीतस्यनसंभवति।पुत्रस्वीकारंकृत्वाएकरात्राशौचंकुर्यात्॥इदंचाशौचंप्रतिगृहीत्रो
र्दंपत्योरेवनतत्सपिंडानां॰ततोयथाशक्तिब्राह्मणान्भोजयेत्॰सर्वान्कामानवाप्नोति॥॥
इतिशौनकोपस्मृतोदत्तपुत्रविधानंसमाप्तं॰॥ हांडेकरोपनाम्नासदाशिवस्यपुस्तकं॥
पुत्रंगृहीत्वाएकरात्रंजाताशौचंदंपतीकुर्यातां॰एतदाशौचंप्रतिगृहीतसपिंडानांनास्तीतिविज्ञानेश्व
रेणोक्तः॥ ७ दत्तपुत्रविधानं॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com